क्रोञ्चदारणः, पुं, (क्रुञ्च + अच् बाहुलकाद्गुणः । क्रोञ्चः पर्व्वतविशेषः । तस्य दारणः दारकः इत्यर्थः । क्रोञ्चं दारयति वा । दृ + णिच् + ल्युः ।) कार्त्तिकेयः । इत्यमरटीकायां रायमुकुटः ॥

क्रोड़ं, क्ली, स्त्री, (क्रुड़ + घञ् ।) बाहोर्मध्यम् । कोल इति भाषा । तत्पर्य्यायः । भुजान्तरम् २ उरः ३ वत्सम् ४ वक्षः ५ । इत्यमरः ।२।६।७७॥ उत्सङ्गः ६ भोगः ७ वपुषःप्राक् ८ । इति राजनिर्घण्टः ॥ (यथा, यजुर्व्वेदे । २५ । ८ । "इन्द्रस्य क्रोड़ोऽदित्यै- पाजस्यम्" । कात्यायनश्रौतसूत्रे च । ६ । ८ । १३ ।
"शेषमिड़ां पात्र्यामासिच्य क्रोड़मनस्थीनि च पास्यति" ॥ हितोपदेशे च ।
"तत्र तरोर्निर्म्मितनीड़क्रोड़े पक्षिणः सुखं वर्षासु निवसन्ति" ॥)

क्रोड़ः, पुं, (क्रुड़ + घञ् । क्रोड़ोऽस्यास्तीति अर्श आदिभ्यः अच् वा ।) शूकरः । इत्यमरः ।२।५।२॥ शनिः । इति मेदिनी ॥ वाराहीकन्दः । इति राजनिर्घण्टः ॥ (यथा, महाभारते । १३ । ५० । २० ।
"नदी शैवालदिग्धाङ्गं हरिश्मश्रुजटाधरम् ।
मत्स्यैः शकुनखैर्गात्रैः क्रोड़ैश्चित्रैरिवार्पितम्" ॥)

क्रोड़कन्दा, स्त्री, (क्रोड़स्य शूकरस्य कन्दा इव ।) वाराहीकन्दः । इति राजनिर्घण्टः ॥

क्रोड़चूड़ा, स्त्री, (क्रोड़े चूड़ा यस्याः ।) महाश्रावणिकाख्यः । इति राजनिर्घण्टः ॥ वड़ थुलकुड़ि इति भाषा ।

क्रोड़पर्णी, स्त्री, (क्रोड़े कण्टकमध्ये पर्णं यस्याः ।) कण्टकारिका । इति शब्दचन्द्रिका ॥ (कण्टकारीशब्दे विवरणमस्य ज्ञेयम् ॥)

क्रोड़पादः, पुं, (क्रोड़े शरीराभ्यन्तरे पादोऽस्य ।) कच्छपः । इति हेमचन्द्रः ॥

क्रोड़ाङ्गः, पुं, (क्रोड़े अङ्गानि अस्य ।) कच्छपः । इति शब्दरत्नावली ॥

क्रोड़ाङ्घ्रिः, पुं, (क्रोड़े अङ्घ्रिरस्य ।) कच्छपः । इति त्रिकाण्डशेषः ॥

क्रोड़ी, स्त्री, (क्रोड़ + जातिवाचकत्वात् गौरादित्वात् ङीष् ।) वाराहीकन्दः । इति राजनिर्घण्टः ॥

क्रोड़ीकरणं, क्ली, (क्रोड़ + कृ + भावे ल्युट् । अभूततद्भावे च्विः ।) आलिङ्गनम् । इति हलायुधः ॥

क्रोड़ीकृतिः, स्त्री, (क्रोड़ + कृ + भावे + क्तिन् । अभूततद्भावे च्विः ।) आलिङ्गनम् । इति हेमचन्द्रः ॥

क्रोड़ीमुखः, पुं, (क्रोड्याः शूकर्य्याः मुखमिव मुखं अस्य ।) गण्डकः । गण्डारः । इति राजनिर्घण्टः ॥ गण्डार इति भाषा ।

क्रोड़ेष्टा, स्त्री, (क्रोड़स्य शूकरस्य इष्टा प्रिया ।) मुस्ता इति राजनिर्घण्टः ॥

क्रोथः, पुं, (क्रुथ् हिंसने + भावे घञ् ।) हननम् । इति हेमचन्द्रः ॥

क्रोधः, पुं, (क्रुध् + भावे घञ् ।) प्रतिकूले सति तैक्ष्ण्यस्य प्रबोधः । (यथा, भगवद्गीतायाम् । ३ । अ०
"काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्" ॥)
तत्पर्य्यायः । कोपः २ अमर्षः ३ रोषः ४ प्रतिघः ५ रुट् ६ क्रुत् ७ क्रुध् ८ । इत्यमरः । १ । ७ । २६ ॥ आमर्षः ९ इति तट्टीकासारसुन्दरी ॥ भीमः १० क्रुधा ११ रुषा १२ । इति शब्दार्णवः ॥ स तु ब्रह्मणो भ्रुवो जातः शरीरस्थषड्रिपोरन्तर्गतश्च । इति पुराणम् ॥ हेलः १ हरः २ हृणिः ३ त्यजः ४ भामः ५ एहः ६ ह्वरः ७ तपुषी ८ जूर्णिः ९ मन्युः १० व्यथिः ११ । इत्येकादश क्रोधनामानि । इति वेदनिघण्टौ २ अध्यायः ॥ (वत्सरभेदः । यथा,
"विषमस्थं जगत् सर्व्वं व्याकुलं समुदाहृतम् ।
जनानां जायते भद्रे ! क्रोधे क्रोधः परस्परम्" ॥
इति शब्दार्थचिन्तामणिः । स्त्रियां टाप् । दक्षकन्याविशेषः । यथा, महाभारते १ । ६५ । १२ ।
"क्रोधा प्राधा च विश्वा च विनता कपिला मुनिः" ॥)

क्रोधजः, पुं, (क्रोधात् जायते । जन् + डः ।) मोहः । यथा, भगवद्गीतायाम् । २ । ६२ ।
"सङ्गात् संजायते कामः कामात् क्रोधोऽभिजायते ।
क्रोधात् भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः" ॥
द्विधाव्यसनगणान्तर्गतव्यसनगणः । यथा, मनुः ।
"पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम् ।
वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः" ॥

क्रोधनः, त्रि, (क्रुध + "क्रुधमण्डार्थेभ्यश्च" । ३ । २ । १५१ । इति युच् ।) क्रोधविशिष्टः । तत्पर्य्यायः । अमर्षणः २ कोपी ३ । इत्यमरः । ३ । १ । ३२ ॥ क्रोधी ४ रोषणः ५ । इति हेमचन्द्रः ॥ (यथा, वेणीसंहारे तृतीयाङ्के ।
"यद्रामेण कृतं तदेव कुरुते द्रौणायणिः क्रोधनः" ॥
कुरुवंशीयन्टपविशेषः ।
यथा, भागवते । ९ । २२ । ११ ।
"ततश्च क्रोधनस्तस्माद् देवातिथिरमुष्य च" ॥
षष्टिवर्षान्तर्गतोनषष्टितमवर्षभेदः । यथा तन्त्रे ।
"रोगो मरणदुर्भिक्षं विरोधोत्तरसङ्कुलम् ।
क्रोधने विषमं सर्व्वं समाख्यातं हरप्रिये !" ॥
भैरवभेदः । यदुक्तं तन्त्रे ।
"असिताङ्गो रुरुश्चण्ड उन्मत्तः क्रोधनस्तथा" ॥)

क्रोधना, स्त्री, (क्रुध् + युच् + स्त्रियां टाप् ।) कोपवती । तत्पर्य्यायः । भामिनी २ चण्डी ३ । इति त्रिकाण्डशेषः ॥ (यथा, रामायणे । २ । ७० । १० ।
"आत्मकामा सदा चण्डी क्रोधना प्राज्ञमानिनी" ॥)

क्रोधमूर्च्छितः, पुं, (क्रोधः क्रोधमय इव मूर्च्छितः ।) चोरनामगन्धद्रव्यम् । इति शब्दरत्नावली ॥ (क्रोधेन मूर्च्छितः ।) अतिकोपने त्रि ॥ (यथा, रामायणे । १ । १ । ४९ ।
"रक्षसां निहतान्यासन् सहस्राणि चतुर्द्दश ।
ततो ज्ञातिवधं श्रुत्वा रावणः क्रोधमूर्च्छितः" ॥)

क्रोधी, [न्] त्रि, (क्रोधोऽस्यास्तीति इनिः । यद्वा, क्रुध्यति इति । क्रुध् + णिनिः ।) क्रोधयुक्तः इति हेमचन्द्रः ॥ महिषः । इति राजनिर्घण्टः ॥ (यथा सुश्रुते । "तत्र जागरूकः शीतद्वेषी दुर्भगस्तेनो मत्सर्य्यनार्य्यो गान्धर्व्वचित्तः स्फुटितकरचरणोऽतिरूक्षश्मश्रुनखकेशः क्रोधी दन्तनखखादी च" ॥)

क्रोशः, पुं, (क्रोशति यतः । क्रुश + अपादाने घञ् ।) सहस्रधनुः । चतुःसहस्रहस्तपरिमाणम् । कोश इति भाषा । तत्पर्य्यायः । गव्यूतम् २ । इति हेमचन्द्रः ॥ (यथा, रघुवंशे । १३ । ७९ ।
"क्रोशार्द्धं प्रकृतिपुरःसरेण गत्वा
काकुत्स्थः स्तिमितजवेन पुष्पकेण" ॥)
द्विसहस्रदण्डः । अष्टसहस्रपरिमाणम् । इति लीलावती ॥ मुंष्कः । यथा,—
"दशदण्डे तु या पूजा तत्सर्व्वमक्षयं भवेत् ।
षष्ठक्रोशे महेशानि तत् ! सर्व्वममृतोपमम् ॥
सप्तमक्रोशके देवि ! सर्व्वं क्षीरोपमं भवेत् ।
अष्टमक्रोशके देवि ! द्रव्यतुल्यं न संशयः ॥
अतः परं महेशानि ! विषतुल्यं न संशयः" ।
इति गुप्तसाधनतन्त्रे षष्ठः पटलः ॥ क्रुश् + भावे घञ् । रोदनम् । आह्वानम् ॥)

क्रोशतालः, पुं, (क्रोशं व्याप्य तालः शब्दभेदः यस्य ।) ढक्का । इति हारावली ॥

क्रोशध्वनिः, पुं, (क्रोशं व्याप्य ध्वनिरस्य ।) ढक्का । इति हारावली ॥

क्रोशयुगं, क्ली, (क्रोशस्य क्रोशपरिमिताध्वनो युगं युग्मम् ।) क्रोशद्वयम् । तत्पर्य्यायः । गव्यूतिः २ । इत्यमरः ॥ गोरुतम् ३ गव्या ४ गव्युतम् ५ । इति हेमचन्द्रः ॥

क्रोष्टा, [ष्टृ] पुं, स्त्री, (क्रोशति रौतीति । क्रुश् + "सितनिगमिमसीति" । उणां १ । ७० । इति तुन् । "तृज्वत् क्रोष्टुः" । ७ । १ । ९५ । इति तृज्वत् ।) शृगालः इत्यमरः ।२।१।१८॥ (यथा, महाभारते- १ । २१४ । ८ ।
"ब्राह्मणस्य प्रशान्तस्य हविर्धार्ष्टैः प्रलुप्यते ।
शार्द्दूलस्य गुहां शून्यां नीचः क्रोष्टाभिमर्द्दति" ॥
यदुवंशीयो राजविशेषः । यथा, हरिवंशे ३३ । ६१
"क्रोष्टोस्तु शृणु राजेन्द्र ! वंशमुत्तमपौरुषम् ।
यदोर्वंशधरस्याथ यज्वनः पुण्यकर्म्मणः ॥
क्रोष्टोर्हि वंशं श्रुत्वेमं सर्व्वपापैः प्रमुच्यते" ॥)

क्रोष्टुकपुच्छिका, स्त्री, (क्रोष्टुकस्य शृगालस्य पुच्छमिव अस्त्यस्याः । ठन् टाप ।) पृश्निपर्णी । चाकुलिया इति भाषा । रामवासक इति ख्याता । इति केचित् । इत्यमरटीकायां स्वामी ॥ गोलोमिका । इति राजनिर्घण्टः ॥

क्रोष्टुकमेखला, स्त्री, (क्रोष्टुकस्येव मेखला कट्यधःपश्चाद्भागो वा अस्त्यस्याः "अर्श आदिभ्यः" । ५ । २ । १२७ । इति अच् टाप् ।) पृश्निपर्णी । इति रत्नमाला ॥

क्रोष्टुपुच्छिका, स्त्री, (क्रोष्टोः शृगालस्य पुच्छमिव अस्त्यस्याः । ठन् टाप् अत इत्वं च ।) पृश्निपर्णी । इति रत्नमाला ॥

क्रोष्टुपुच्छी, स्त्री, (क्रोष्टोः पुच्छमिव अस्त्यस्याः इति "अर्श आदिभ्यः" । ५ । २ । १२७ । इति अच् ङीष् ।) पृश्निपर्णी । इति शब्दरत्नावली ॥

क्रोष्टुफलः, पुं, (क्रोष्टोः प्रियं फलं अस्य अस्मिन् वा ।) इङ्गुदीवृक्षः । इति राजनिर्घण्टः ॥

क्रोष्टुविन्ना, स्त्री, (क्रोष्टुभिः विन्ना ज्ञाता वा लब्धा इव ।) पृश्निपर्णी । इत्यमरः । २ । ४ । ९३ ॥ विरालक्रान्ति इति ख्याता इति केचित् । इति भरतः ॥ (अस्याः पर्य्यायाः । यथा,—